श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ षष्ठः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षष्ठः सर्गः ॥

## भगवतः शिवस्य संमत्या देवानां रक्षोवधार्थं श्रीविष्णोः शरणग्रहणं ततः समाश्वस्तानां च निवर्तनं देवानामुपरि रक्षसामाक्रमणं देवानां साहाय्यकरणाय श्रीविष्णोरागमनं च

तैर्वध्यमाना देवाश्च ऋषयश्च तपोधनाः।
भयार्ताः शरणं जग्मुर्देवदेवं महेश्वरम्॥ **7.6.1** ॥

जगत्सृष्ट्यन्तकर्तारमजमव्यक्तरूपिणम्।
आधारं सर्वलोकानामाराध्यं परमं गुरुम्॥ **7.6.2** ॥

ते समेत्य तु कामारिं त्रिपुरारिं त्रिलोचनम्।
ऊचुः प्राञ्जलयो देवा भयगद्गदभाषिणः॥ **7.6.3** ॥

सुकेशपुत्रैर्भगवन् पितामहवरोद्धतैः।
प्रजाध्यक्ष प्रजाः सर्वा बाध्यन्ते रिपुबाधनैः॥ **7.6.4** ॥

शरण्यान्यशरण्यानि ह्याश्रमाणि कृतानि नः।
स्वर्गाच्च देवान् प्रच्याव्य स्वर्गे क्रीडन्ति देववत्॥ **7.6.5** ॥

अहं विष्णुरहं रुद्रो ब्रह्माहं देवराडहम्।
अहं यमश्च वरुणश्चन्द्रोऽहं रविरप्यहम्॥ **7.6.6** ॥

इति माली सुमाली च माल्यवांश्चैव राक्षसाः।
बाधन्ते समरोद्धर्षा ये च तेषां पुरःसराः॥ **7.6.7** ॥

तन्नो देव भयार्तानामभयं दातुमर्हसि।
अशिवं वपुरास्थाय जहि वै देवकण्टकान्॥ **7.6.8** ॥

इत्युक्तस्तु सुरैः सर्वैः कपर्दी नीललोहितः।
सुकेशं प्रति सापेक्षः प्राह देवगणान् प्रभुः॥ **7.6.9** ॥

अहं तान्न हनिष्यामि ममावध्या हि तेऽसुराः।
किं तु मन्त्रं प्रदास्यामि यो वै तान् निहनिष्यति॥ **7.6.10** ॥

एतमेव समुद्योगं पुरस्कृत्य महर्षयः।
गच्छध्वं शरणं विष्णुं हनिष्यति स तान् प्रभुः॥ **7.6.11** ॥

ततस्तु जयशब्देन प्रतिनन्द्य महेश्वरम्।
विष्णोः समीपमाजग्मुर्निशाचरभयार्दिताः॥ **7.6.12** ॥

शङ्खचक्रधरं देवं प्रणम्य बहुमान्य च।
ऊचुः सम्भ्रान्तवद् वाक्यं सुकेशतनयान् प्रति॥ **7.6.13** ॥

सुकेशतनयैर्देव त्रिभिस्त्रेताग्निसन्निभैः।
आक्रम्य वरदानेन स्थानान्यपहतानि नः॥ **7.6.14** ॥

लङ्का नाम पुरी दुर्गा त्रिकूटशिखरे स्थिता।
तत्र स्थिताः प्रबाधन्ते सर्वान् नः क्षणदाचराः॥ **7.6.15** ॥

स त्वमस्मद्धितार्थाय जहि तान् मधुसूदन।
शरणं त्वां वयं प्राप्ता गतिर्भव सुरेश्वर॥ **7.6.16** ॥

चक्रकृत्तास्यकमलान् निवेदय यमाय वै।
भयेष्वभयदोऽस्माकं नान्योऽस्ति भवता विना॥ **7.6.17** ॥

राक्षसान् समरे हृष्टान् सानुबन्धान् मदोद्धतान्।
नुद त्वं नो भयं देव नीहारमिव भास्करः॥ **7.6.18**॥

इत्येवं दैवतैरुक्तो देवदेवो जनार्दनः।
अभयं भयदोऽरीणां दत्त्वा देवानुवाच ह॥ **7.6.19**॥

सुकेशं राक्षसं जाने ईशानवरदर्पितम्।
तांश्चास्य तनयाञ्जाने येषां ज्येष्ठः स माल्यवान्॥ **7.6.20**॥

तानहं समतिक्रान्तमर्यादान् राक्षसाधमान्।
निहनिष्यामि सङ्क्रुद्धः सुरा भवत विज्वराः॥ **7.6.21**॥

इत्युक्तास्ते सुराः सर्वे विष्णुना प्रभविष्णुना।
यथावासं ययुर्हृष्टाः प्रशंसन्तो जनार्दनम्॥ **7.6.22**॥

विबुधानां समुद्योगं माल्यवांस्तु निशाचरः।
श्रुत्वा तौ भ्रातरौ वीराविदं वचनमब्रवीत्॥ **7.6.23**॥

अमरा ऋषयश्चैव सङ्गम्य किल शङ्करम्।
अस्मद्वधं परीप्सन्त इदं वचनमब्रुवन्॥ **7.6.24**॥

सुकेशतनया देव वरदानबलोद्धताः।
बाधन्तेऽस्मान् समुद्दृप्ता घोररूपाः पदे पदे॥ **7.6.25**॥

राक्षसैरभिभूताः स्मो न शक्ताः स्म प्रजापते।
स्वेषु सद्मसु संस्थातुं भयात् तेषां दुरात्मनाम्॥ **7.6.26**॥

तदस्माकं हितार्थाय जहि तांश्च त्रिलोचन।
राक्षसान् हुङ्कृतेनैव दह प्रदहतां वर॥ **7.6.27**॥

इत्येवं त्रिदशैरुक्तो निशम्यान्धकसूदनः।
शिरः करं च धुन्वान इदं वचनमब्रवीत्॥ **7.6.28**॥

अवध्या मम ते देवाः सुकेशतनया रणे।
मन्त्रं तु वः प्रदास्यामि यस्तान् वै निहनिष्यति॥ **7.6.29**॥

योऽसौ चक्रगदापाणिः पीतवासा जनार्दनः।
हरिर्नारायणः श्रीमाञ्शरणं तं प्रपद्यथ॥ **7.6.30**॥

हरादवाप्य ते मन्त्रं कामारिमभिवाद्य च।
नारायणालयं प्राप्य तस्मै सर्वं न्यवेदयन्॥ **7.6.31**॥

ततो नारायणेनोक्ता देवा इन्द्रपुरोगमाः।
सुरारीस्तान् हनिष्यामि सुरा भवत निर्भयाः॥ **7.6.32**॥

देवानां भयभीतानां हरिणा राक्षसर्षभौ।
प्रतिज्ञातो वधोऽस्माकं चिन्त्यतां यदिह क्षमम्॥ **7.6.33**॥

हिरण्यकशिपोर्मृत्युरन्येषां च सुरद्विषाम्।
नमुचिः कालनेमिश्च संह्रादो वीरसत्तमः॥ **7.6.34**॥

राधेयो बहुमायी च लोकपालोऽथ धार्मिकः।
यमलार्जुनौ च हार्दिक्यः शुम्भश्चैव निशुम्भकः॥ **7.6.35**॥

असुरा दानवाश्चैव सत्त्ववन्तो महाबलाः।
सर्वे समरमासाद्य न श्रूयन्तेऽपराजिताः॥ **7.6.36**॥

सर्वैः क्रतुशतैरिष्टं सर्वे मायाविदस्तथा।
सर्वे सर्वास्त्रकुशलाः सर्वे शत्रुभयङ्कराः॥ **7.6.37**॥

नारायणेन निहताः शतशोऽथ सहस्रशः।
एतज्ज्ञात्वा तु सर्वेषां क्षमं कर्तुमिहार्हथ।
दुःखं नारायणं जेतुं यो नो हन्तुमिहेच्छति॥ **7.6.38**॥

ततः सुमाली माली च श्रुत्वा माल्यवतो वचः।
ऊचतुर्भ्रातरं ज्येष्ठमश्विनाविव वासवम् ॥ **7.6.39** ॥

स्वधीतं दत्तमिष्टं च ऐश्वर्यं परिपालितम्।
आयुर्निरामयं प्राप्तं सुधर्मः स्थापितः पथि ॥ **7.6.40** ॥

देवसागरमक्षोभ्यं शस्त्रैः समवगाह्य च।
जिता द्विषो ह्यप्रतिमास्तन्नो मृत्युकृतं भयम् ॥ **7.6.41** ॥

नारायणश्च रुद्रश्च शक्रश्चापि यमस्तथा।
अस्माकं प्रमुखे स्थातुं सर्वे बिभ्यति सर्वदा ॥ **7.6.42** ॥

विष्णोर्द्वेषस्य नास्त्येव कारणं राक्षसेश्वर।
देवानामेव दोषेण विष्णोः प्रचलितं मनः ॥ **7.6.43** ॥

तस्मादद्यैव सहिताः सर्वेऽन्योन्यसमावृताः।
देवानेव जिघांसामो येभ्यो दोषः समुत्थितः ॥ **7.6.44** ॥

एवं सम्मन्त्र्य बलिनः सर्वसैन्यसमावृताः।
उद्योगं घोषयित्वा तु सर्वे नैर्ऋतपुङ्गवाः ॥ **7.6.45** ॥

युद्धाय निर्ययुः क्रुद्धा जम्भवृत्रादयो यथा।
इति ते राम सम्मन्त्र्य सर्वोद्योगेन राक्षसाः ॥ **7.6.46** ॥

युद्धाय निर्ययुः सर्वे महाकाया महाबलाः।
स्यन्दनैर्वारणैश्चैव हयैश्च करिसन्निभैः ॥ **7.6.47** ॥

खरैर्गोभिरथोष्ट्रैश्च शिशुमारैर्भुजङ्गमैः।
मकरैः कच्छपैर्मीनैर्विहङ्गैर्गरुडोपमैः ॥ **7.6.48** ॥

सिंहैर्व्याघ्रैर्वराहैश्च सृमरैश्चमरैरपि।
त्यक्त्वा लङ्कां गताः सर्वे राक्षसा बलगर्विताः ॥ **7.6.49** ॥

प्रयाता देवलोकाय योद्धुं दैवतशात्रवः।
लङ्काविपर्ययं दृष्ट्वा यानि लङ्कालयान्यथ॥ **7.6.50**॥

भूतानि भयदर्शीनि विमनस्कानि सर्वशः।
रथोत्तमैरुह्यमानाः शतशोऽथ सहस्रशः॥ **7.6.51**॥

प्रयाता राक्षसास्तूर्णं देवलोकं प्रयत्नतः।
रक्षसामेव मार्गेण दैवतान्यपचक्रमुः॥ **7.6.52**॥

भौमाश्चैवान्तरिक्षाश्च कालाज्ञप्ता भयावहाः।
उत्पाता राक्षसेन्द्राणामभावाय समुत्थिताः॥ **7.6.53**॥

अस्थीनि मेघा ववृषुरुष्णं शोणितमेव च।
वेलां समुद्राश्चोत्क्रान्ताश्चेलुश्चाप्यथ भूधराः॥ **7.6.54**॥

अट्टहासान् विमुञ्चन्तो घननादसमस्वनाः।
वाश्यन्त्यश्च शिवास्तत्र दारुणं घोरदर्शनाः॥ **7.6.55**॥

सम्पतन्त्यथ भूतानि दृश्यन्ते च यथाक्रमम्।
गृध्रचक्रं महच्चात्र प्रज्वालोद्गारिभिर्मुखैः॥ **7.6.56**॥

रक्षोगणस्योपरिष्टात् परिभ्रमति कालवत्।
कपोता रक्तपादाश्च सारिका विद्रुता ययुः॥ **7.6.57**॥

काका वाश्यन्ति तत्रैव विडाला वै द्विपादयः।
उत्पातांस्ताननादृत्य राक्षसा बलदर्पिताः॥ **7.6.58**॥

यान्त्येव न निवर्तन्ते मृत्युपाशावपाशिताः।
माल्यवांश्च सुमाली च माली च सुमहाबलः॥ **7.6.59**॥

पुरस्सरा राक्षसानां ज्वलिता इव पावकाः।
माल्यवन्तं तु ते सर्वे माल्यवन्तमिवाचलम्॥ **7.6.60**॥

निशाचरा आश्रयन्ति धातारमिव देवताः।
तद् बलं राक्षसेन्द्राणां महाभ्रघननादितम्॥ **7.6.61** ॥

जयेप्सया देवलोकं ययौ मालिवशे स्थितम्।
राक्षसानां समुद्योगं तं तु नारायणः प्रभुः॥ **7.6.62** ॥

देवदूतादुपश्रुत्य चक्रे युद्धे तदा मनः।
स सज्जायुधतूणीरो वैनतेयोपरि स्थितः॥ **7.6.63** ॥

आसाद्य कवचं दिव्यं सहस्रार्कसमद्युति।
आबद्ध्य शरसम्पूर्णे इषुधी विमले तदा॥ **7.6.64** ॥

श्रोणिसूत्रं च खड्गं च विमलं कमलेक्षणः।
शङ्खचक्रगदाशार्ङ्गखड्गांश्चैव वरायुधान्॥ **7.6.65** ॥

सुपर्णं गिरिसङ्काशं वैनतेयमथास्थितः।
राक्षसानामभावाय ययौ तूर्णतरं प्रभुः॥ **7.6.66** ॥

सुपर्णपृष्ठे स बभौ श्यामः पीताम्बरो हरिः।
काञ्चनस्य गिरेः शृङ्गे सतडित्तोयदो यथा॥ **7.6.67** ॥

स सिद्धदेवर्षिमहोरगैश्च
गन्धर्वयक्षैरुपगीयमानः।
समाससादासुरसैन्यशत्रु -
श्चक्रासिशार्ङ्गायुधशङ्खपाणिः॥ **7.6.68** ॥

सुपर्णपक्षानिलनुन्नपक्षं
भ्रमत्पताकं प्रविकीर्णशस्त्रम्।
चचाल तद्राक्षसराजसैन्यं
चलोपलं नीलमिवाचलाग्रम्॥ **7.6.69** ॥

ततः शितैः शोणितमांसरूषितै -
युगान्तवैश्वानरतुल्यविग्रहैः।
निशाचराः सम्परिवार्य माधवं
वरायुधैर्निर्बिभिदुः सहस्रशः॥ **7.6.70** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षष्ठः सर्गः॥